येषां न जग्मुः कराः । ते दण्डाङ्कुशचक्रचापकुलिशश्रीवत्स-मत्स्याङ्कितैर्जायन्ते पृथिवीभुजः कथमिवाम्भोजप्रभैः पाणिभिः ॥ १३ ॥ विप्राः क्षोणिभुजो विशस्तदितरे क्षीराज्यमध्वा-सवैस्त्वां देवि ! त्रिपुरे ! पराऽपरमयीं सन्तर्प्य पूजाविधौ । यां यां प्रार्थयते मनः स्थिरधियां तेषां त एव ध्रुवं तां तां सिद्धिम-वाप्नुवन्ति तरसा विघ्नैरविघ्नीकृताः ॥ १४ ॥ शब्दानां जननी त्वमत्र भुवने वाग्वादिनीत्युच्यसे, त्वत्तः केशववासवप्रभृतयोऽ-प्याविर्भवन्ति स्फुटम् । लीयन्ते खलु यत्र कल्पविरमे ब्रह्मा-दयस्तेऽप्यमी सा त्वं काचिदऽचिन्त्यरूपमहिमा शक्तिः परा गीयसे ॥ १५ ॥ देवानां त्रितयं त्रयी हुतभुजां शक्तित्रयं त्रिस्वरास्त्रैलोक्यं त्रिपदी त्रिपुष्करमथो त्रि[illegible]स्त्रयः ।

तिकरे सुरसुन्दरीणां सीमन्तसीम्नि कुसुमस्तवकायितं यैः ॥१०॥ मूर्ध्नि स्फुरत्तुहिनदीधितिदीप्तिदीप्तं मध्येललाटममरायुधरश्मि-चित्रम् । हृच्चक्रचुम्बिहुतभुक्कणिकानुरूपं ज्योतिर्यदेतदिदमम्ब ! तव स्वरूपम् ॥ ११ ॥ रूपं तव स्फुरितचन्द्रमरीचिगौरमाऽ-लोकते शिरसि वागधिदैवतं यः । निःसीमसूक्तिरचनामृतनि-र्भरस्य तस्य प्रसादमधुराः प्रसरन्ति वाचः ॥ १२ ॥ सिन्दूर-पांसुपटलच्छुरितामिव द्यां त्वत्तेजसा जतुरसस्नपितामिवोर्वीम् । यः पश्यति क्षणमपि त्रिपुरे ! विहाय व्रीडां मृडानि ! सुदृश-स्तमनुद्रवन्ति ॥ १३ ॥ मातर्मुहूर्तमपि यः स्मरति स्वरूपं लाक्षा-रसप्रसरतन्तुनिभं भवत्याः । ध्यायंत्यनन्यमनसस्तमनङ्गतप्ताः प्रद्युम्नसीम्नि सुभगत्वगुणं तरुण्याः ॥ १४ ॥ योयं चकास्ति गगनार्णवरत्नमिन्दुर्योयं सुराऽसुरगुरुः पुरुषः पुराणः । यद्वामम‍र्ध-

परेभ्यो नमः ॥ १९ ॥ बोद्धव्या निपुणं बुधैः स्तुतिरियं कृत्वा मनस्तद्गतं भारत्यास्त्रिपुरेत्यनन्यमनसो यत्राद्यवृत्ते स्फुटम् । एकद्वित्रिपदक्रमेण कथितस्त्वत्पादसंख्याक्षरैर्मन्त्रोद्धारविधिर्वि-[illegible]हितः सत्सम्प्रदायान्वितः ॥ २० ॥ सावद्यं निरवद्यमस्तु यदि वा किंवानया चिन्तया नूनं स्तोत्रमिदं पठिष्यति नरो यस्यास्ति भक्तिस्त्वयि । सञ्चिन्त्यापि लघुत्वमात्मनि दृढं सञ्जायमानं हठात्त्वद्भक्त्या मुखरीकृतेन रचितं यस्मान्मयापि स्फुटम् ॥ २१ ॥ इति श्रीपञ्चस्तव्यां लघुस्तवः प्रथमः समाप्तः ॥

---

## अथ चर्चस्तवो द्वितीयः ॥

भवत्याः ॥ ५ ॥ यस्मिन्मनागऽपि नवाम्बुजपत्रगौरि ! गौरि ! प्रसादमधुरां दृशमाऽदधासि । तस्मिन्निरन्तरमऽनङ्गशरावकीर्ण-सीमन्तिनीनयनसन्ततयः पतन्ति ॥ ६ ॥ पृथ्वीभुजोऽप्युदयन-प्रवरस्य तस्य विद्याधरप्रणतिचुम्बितपादपीठः । यच्चक्रवर्तिपद-वीप्रणयः स एष त्वत्पादपङ्कजरजःकणजः प्रसादः ॥ ७ ॥ कल्पद्रुमप्रसवकल्पितचित्रपूजामुद्दीपितप्रियतमामदरक्तगीतिम् । नित्यं भवानि भवतीमुपवीणयन्ति विद्याधराः कनकशैलगुहा-गृहेषु ॥ ८ ॥ लक्ष्मीवशीकरणकर्मणि कामिनीनामाऽकर्षणव्य-तिकरेषु च सिद्धमन्त्रः । नीरन्ध्रमोहतिमिरच्छिदुरप्रदीपो देवि ! त्वदऽङ्घ्रिजनितो जयति प्रसादः ॥ ९ ॥ देवि त्वदऽङ्घ्रिनखर-त्नभुवो मयूखाः प्रत्यग्रमौक्तिकरुचो मुदमुद्वहन्ति । सेवानतिव्य-तिकरे सुरसुन्दरीणां सीमन्तसीम्नि कुसुमस्तवकायितं यैः ॥१०॥ मूर्ध्नि स्फुरत्तुहिनदीधितिदीप्तिदीप्तं मध्येललाटममरायुधरश्मि-चित्रम् । हृच्चक्रचुम्बिहुतभुक्कणिकानुरूपं ज्योतिर्यदेतदिदमम्ब ! तव स्वरूपम् ॥ ११ ॥ रूपं तव स्फुरितचन्द्रमरीचिगौरमाऽ-लोकते शिरसि वागधिदैवतं यः । निःसीमसूक्तिरचनामृतनि-र्भरस्य तस्य प्रसादमधुराः प्रसरन्ति वाचः ॥ १२ ॥ सिन्दूर-पांसुपटलच्छुरितामिव द्यां त्वत्तेजसा जतुरसस्नपितामिवोर्वीम् । यः पश्यति क्षणमपि त्रिपुरे ! विहाय व्रीडां मृडानि ! सुदृश-स्तमनुद्रवन्ति ॥ १३ ॥ मातर्मुहूर्तमपि यः स्मरति स्वरूपं लाक्षा-रसप्रसरतन्तुनिभं भवत्याः । ध्यायंत्यनन्यमनसस्तमनङ्गतप्ताः प्रद्युम्नसीम्नि सुभगत्वगुणं तरुण्याः ॥ १४ ॥ योयं चकास्ति गगनार्णवरत्नमिन्दुर्योयं सुराऽसुरगुरुः पुरुषः पुराणः । यद्वामसर्ध-

मिदमऽन्धकसूदनस्य देवि ! त्वमेव तदितिप्रतिपादयन्ति ॥१५॥ इच्छानुरूपमनुरूपगुणप्रकर्षं सङ्कर्षणि ! त्वमनुसृत्य यदा विभर्षि । जायेत स त्रिभुवनैकगुरुस्तदानीं देवः शिवोऽपि भुवनत्रयसूत्रधारः ॥ १६ ॥ रुद्राणि ! विद्रुममयीं प्रतिमामिव त्वां ये चिन्तयन्त्यरुणकान्तिमऽनन्यरूपाम् । तानेत्य पक्ष्मलदृशः प्रसभं भजन्ते कण्ठाऽवसक्तमृदुबाहुलतास्तरुण्यः ॥ १७ ॥ त्वद्रूपमुल्लसितदाडिमपुष्परक्तमुद्भावयेन्मदनदैवतमक्षरं यः । तं रूपहीनमपि मन्मथनिर्विशेषमालोकयन्त्युरुनितम्बभरास्तरुण्यः ॥ १८ ॥ ध्याताऽसि हैमवति ! येन हिमांशुरश्मिमालाऽमलद्युतिरऽकल्मषमानसेन । तस्याऽविलम्बमऽनवद्यमऽनल्पकल्पमऽल्पैर्दिनैः सृजसि सुन्दरि ! वाग्विलासम् ॥ १९ ॥ आधारमारुतनिरोधवशेन येषां सिन्दूररञ्जितसरोजगुणानुकारि । तीव्रं हृदि स्फुरति देवि ! वपुस्त्वदीयं ध्यायन्ति तानिह समीहितसिद्धसाध्याः ॥ २० ॥ सामैन्दवीमिव कलामनुभालदेशमुद्भासिताम्बरतलामऽवलोकयन्तः । सद्यो भवानि ! सुधियः कवयो भवन्ति त्वं भावनाहितधियां कुलकामधेनुः ॥ २१ ॥ त्वां व्यापिनीति सुमना इति कुण्डलीति त्वां कामिनीति कमलेति कलावतीति । त्वां मालिनीति ललितेत्यपराजितेति देवि ! स्तुवन्ति विजयेति जयेत्युमेति ॥ २२ ॥ ये चिन्तयन्त्यरुणमण्डलमध्यवर्ति रूपं तवाम्ब ! नवयावकपङ्कपिङ्गम् । तेषां सदैव कुसुमायुधबाणभिन्नाऽऽवक्षःस्थला मृगदृशो वशगा भवन्ति ॥ २३ ॥ उत्तप्तहेमरुचिरे ! त्रिपुरे ! पुनीहि चेतश्चिरन्तनमघौघवनं लुनीहि । कारागृहे निगडबन्धनपीडितस्य त्वत्संस्मृतौ

झटिति मे निगडास्त्रुट्यन्ते ॥ २४ ॥ शर्वाणि सर्वजनवन्दित-पादपद्मे पद्मच्छदच्छविविडम्बितनेत्रलक्ष्मि ! । निष्पापमूर्तिजन-मानसराजहंसि ! हंसि त्वमापदमऽनेकविधां जनस्य ॥ २५ ॥ त्वत्पादपङ्कजरजःप्रणिपातपूतैः पुण्यैरनल्पमतिभिः [illegible] कवीन्द्रैः । क्षीरक्षपाकरदुकूलहिमावदाता कैरप्यवापि भुवनत्रि-तयेऽपि कीर्तिः ॥ २६ ॥ त्वद्रूपैकनिरूपणप्रणयितावन्धो दृशो-स्त्वद्गुणग्रामाकर्णनरागिता श्रवणयोस्त्वत्संस्मृतिश्चेतसि । त्वत्पा-दार्चनचातुरी करयुगे त्वत्कीर्तनं वाचि मे कुत्रापि त्वदुपासन-व्यसनिता मे देवि ! मा शाम्यतु ॥ २७ ॥ उद्दामकामपरमार्थ-सरोजषण्डचण्डद्युतिद्युतिमुपासितषट्प्रकाराम् । मोहद्विपेन्द्रकद-नोद्यतबोधसिंहलीलागुहां भगवतीं त्रिपुरां नमामि ॥ २८ ॥ गणेशमद्रुकस्तुता रतिसहायकामान्विता स्मरारिवरविष्टरा कुसु-मबाणबाणैर्युता । अनङ्गकुसुमादिभिः परिवृता च सिद्धैस्त्रिभिः कदम्बवनमध्यगा त्रिपुरसुन्दरी पातु नः ॥ २९ ॥ यः स्तोत्रमेत-दनुवासरमीश्वरायाः श्रेयस्करं पठति वा यदि वा शृणोति । तस्येप्सितं फलति राजभिरीड्यतेऽसौ जायेत स प्रियतमो हरिणेक्षणानाम् ॥ ३० ॥ ब्रह्मेन्द्ररुद्रहरिचन्द्रसहस्ररश्मिस्कन्द-द्विपाननहुताशनवन्दितायै । वागीश्वरि ! त्रिभुवनेश्वरि ! विश्व-मातरन्तर्बहिश्च कृतसंस्थितये नमस्ते ॥ ३१ ॥ इति श्रीपञ्चस्तव्यां चर्चस्तवो द्वितीयः समाप्तः ॥ ॥

---

## अथ तृतीयो घटस्तवः ॥ ३ ॥

ॐनमस्त्रिपुरसुन्दर्यै ॥ देवि त्र्यम्बकपत्नि पार्वति सति त्रैलोक्यमातः शिवे शर्वाणि त्रिपुरे मृडानि वरदे रुद्राणि कात्या-

यनि । भीमे भैरवि चण्डि शर्वरि कले ! कालक्षये शूलिनि त्वत्पादप्रणतानऽनन्यमनसः पर्याकुलान्पाहि नः ॥ १ ॥ उन्मत्ता इव सग्रहा इव विषव्यासक्तमूर्च्छा इव प्राप्तप्रौढमदा इवार्तिविरहग्रस्ता इवार्ता इव । ये ध्यायन्ति हि शैलराजतनयां धन्यास्त एकाग्रतस्त्यक्तोपाधिविवृद्धरागमनसो ध्यायन्ति वामभ्रुवः ॥ २ ॥ देवि त्वां सकृदेव यः प्रणमति क्षोणीभृतस्तं नमन्त्याजन्म स्फुरदङ्घ्रिपीठविलुठत्कोटीरकोटिच्छटाः । यस्त्वामर्चति सोऽर्च्यते सुरगणैर्यः स्तौति स स्तूयते यस्त्वां ध्यायति तं स्मरार्तिविधुरा ध्यायन्ति वामभ्रुवः ॥ ३ ॥ ध्यायन्ति ये क्षणमपि त्रिपुरे हृदि त्वां लावण्ययौवनधनैरपि विप्रयुक्ताः । ते विस्फुरन्ति ललितायतलोचनानां चित्तैकभित्तिलिखितप्रतिमाः पुमांसः ॥ ४ ॥ एतं किंतु दृशा पिबाम्युत विशाम्यस्याङ्गमङ्गैर्निजैः, किंवास्मुं निगलाम्यनेन सहसा किंवैकतामाश्रये । तस्येत्थं विवशो विकल्पघटनाकूतेन योषिज्जनः किं तद्यन्न करोति देवि ! हृदये यस्य त्वमावर्तसे ॥ ५ ॥ विश्वव्यापिनि यद्वदीश्वर इति स्थाणावनन्याश्रयः शब्दः शक्तिरिति त्रिलोकजननि त्वय्येव तथ्यस्थितिः । इत्थं सत्यपि शक्नुवन्ति यदिमाः क्षुद्रा रुजो बाधितुं त्वद्भक्तानऽपि न क्षिणोषि च रुषा तद्देवि चित्रं महत् ॥ ६ ॥ इन्दोर्मध्यगतां मृगाङ्कसदृशच्छायां मनोहारिणीं पाण्डूत्फुल्लसरोरुहासनगतां स्निग्धप्रदीपच्छविम् । वर्षन्तीममृतं भवानि भवतीं ध्यायन्ति ये देहिनस्ते निर्मुक्तरुजो भवन्ति विपदः प्रोज्झन्ति तान्दूरतः ॥ ७ ॥ पूर्णेन्दोः शकलैरिवातिबहलैः पीयूषपूरैरिव क्षीराब्धेर्लहरीभरैरिव सुधापङ्कस्य

पिण्डैरिव । प्रालेयैरिव निर्मितं तव वपुर्ध्यायन्ति ये श्रद्धया चित्तान्तर्निहतार्त्तितापविपदस्ते सम्पदं बिभ्रति ॥ ८ ॥ ये संस्मरन्ति तरलां सहसोल्लसन्तीं त्वां ग्रन्थिपञ्चकभिदं तरुणार्कशोणाम् । रागार्णवे बहलरागिणि मज्जयन्तीं कृत्स्नं जगद्दधति चेतसि तान्मृगाक्ष्यः ॥ ९ ॥ लाक्षारसस्नपितपङ्कजतन्तुतन्वीमऽन्तः स्मरत्यऽनुदिनं भवतीं भवानि । यस्तं स्मरप्रतिममऽप्रतिमस्वरूपा नेत्रोत्पलैर्मृगदृशो भृशमऽर्चयन्ति ॥ १० ॥ स्तुमस्त्वां वाचमऽव्यक्तां हिमकुन्देन्दुरोचिषम् । कदम्बमालां बिभ्राणामाऽऽपादतललम्बिनीम् ॥ ११ ॥ मूर्ध्नीन्दोः सितपङ्कजासनगतां प्रालेयपाण्डुत्विषं वर्षन्तीमऽमृतं सरोरुहभुवो वक्त्रेऽपि रन्ध्रेऽपि च । अच्छिन्ना च मनोहरा च ललिता चाऽतिप्रसन्नाऽपि च त्वामेव स्मरतां स्मरारिदयिते ! वाक्सर्वतो वल्गति ॥ १२ ॥ ददातीष्टान्भोगान्क्षपयति रिपून्हन्ति विपदो दहत्याधीन्व्याधीञ्छमयति सुखानि प्रतनुते । हठादऽन्तर्दुःखं दलयति पिनष्टीष्टविरहं सकृद्ध्याता देवी किमिव निरवद्यं न कुरुते ॥ १३ ॥ यस्त्वां ध्यायति वेत्ति विन्दति जपत्यालोकते चिन्तयत्यन्वेति प्रतिपद्यते कलयति स्तौत्याश्रयत्यर्चति । यश्च त्र्यम्बकवल्लभे तव गुणानाऽकर्णयत्यादरात्तस्य श्रीर्न गृहादपैति विजयस्तस्याग्रतो धावति ॥ १४ ॥ किं किं दुःखं दनुजदलिनि ! क्षीयते न स्मृतायां का का कीर्तिः कुलकमलिनि ! ख्याप्यते न स्तुतायाम् । का का सिद्धिः सुरवरनुते ! प्राप्यते नार्चितायां कं कं योगं त्वयि न चिनुते चित्तमालम्बितायाम् ॥ १५ ॥ ये देवि ! दुर्धरकृतान्तमुखान्तरस्था ये कालि !

कालघनपाशनितान्तबद्धाः । ये चण्डि ! चण्डगुरुकल्मषसिन्धुमग्नास्तान्पासि मोचयसि तारयसि स्मृतैव ॥ १६ ॥ लक्ष्मीवशीकरणचूर्णसहोदराणि त्वत्पादपङ्कजरजांसि चिरं जयन्ति । यानि प्रणाममिलितानि नृणां ललाटे लुम्पंति दैवलिखितानि दुरक्षराणि ॥ १७ ॥ रे मूढाः किमयं वृथैव तपसा कायः परिक्लिश्यते यज्ञैर्वा बहुदक्षिणैः किमितरे रिक्तीक्रियन्ते गृहाः । भक्तिश्चेद्ऽविनाशिनी भगवती पादद्वयी सेव्यतामुन्निद्राम्बुरुहातपत्रसुभगा लक्ष्मीः पुरो धावति ॥ १८ ॥ याचे न कंचन न कंचन वञ्चयामि सेवे न कंचन निरस्तसमस्तदैन्यः । श्लक्ष्णं वसे मधुरमद्मि भजे वरस्त्रीर्देवी हृदि स्फुरति मे कुलकामधेनुः ॥ १९ ॥ शब्दब्रह्ममयि ! स्वच्छे देवि त्रिपुरसुन्दरि । यथाशक्ति जपं पूजां गृहाण परमेश्वरि ॥ २० ॥ नन्दन्तु साधकाः सर्वे विनश्यन्तु विदूषकाः । अवस्था शाम्भवी मेऽस्तु प्रसन्नोऽस्तु गुरुः सदा ॥ २१ ॥ दर्शनात्पापशमनी जपान्मृत्युविनाशिनी । पूजिता दुःखदौर्भाग्यहरा त्रिपुरसुन्दरी ॥ २२ ॥ नमामि यामिनीनाथलेखालङ्कृतकुन्तलाम् । भवानीं भवसन्तापनिर्वापणसुधानदीम् ॥ २३ ॥ मंत्रहीनं क्रियाहीनं विधिहीनं च यद्गतम् । त्वया तत्क्षम्यतां देवि ! कृपया परमेश्वरि ॥२४॥ इति पञ्चस्तव्यांघटस्तवस्तृतीयः ॥

---

## अथ पञ्चस्तव्यामऽम्बस्तवश्चतुर्थः ।

ॐ यामाऽऽमनन्ति मुनयः प्रकृतिं पुराणीं विद्येति यां श्रुतिरहस्यविदो वदन्ति । तामर्धपल्लवितशङ्कररूपमुद्रां देवीमऽ-

नन्यशरणः शरणं प्रपद्ये ॥ १ ॥ अम्ब ! स्तवेषु तव तावदऽकर्तृकाणि कुण्ठीभवन्ति वचसामऽपि गुम्फनानि । डिम्भस्य मे स्तुतिरसावऽसमञ्जसाऽपि वात्सल्यनिघ्नहृदयां भवतीं धिनोति ॥ २ ॥ व्योमेति बिन्दुरिति नाद इतीन्दुरेखारूपेति वाग्भवतनूरिति मातृकेति । निःष्यन्दमानसुखबोधसुधास्वरूपा विद्योतसे मनसि भाग्यवतां जनानाम् ॥ ३ ॥ आविर्भवत्पुलकसन्ततिभिः शरीरैर्निष्यन्दमानसलिलैर्नयनैश्च नित्यम् । वाग्भिश्च गद्गदपदाभिरुपासते ये पादौ तवाम्ब ! हृदयेषु त एव धन्याः ॥ ४ ॥ वक्त्रं यदुद्यतमऽभिष्टुतये भवत्यास्तुभ्यं नमो यदपि देवि ! शिरः करोति । चेतश्च यत्त्वयि परायणमम्ब तानि कस्यापि कैरपि भवन्ति तपोविशेषैः ॥ ५ ॥ मूलालवालकुहरादुदिता भवानि निर्भिद्य षट्सरसिजानि तडिल्लतेव । भूयोऽपि तत्र विशसि ध्रुवमण्डलेन्दुनिःष्यन्दमानपरमामृततोयरूपा ॥ ६ ॥ दग्धं यदा मदनमेकमऽनेकधा ते मुग्धः कटाक्षविधिरङ्कुरयांचकार । धत्ते तदाप्रभृति देवि ललाटनेत्रं सत्यं ह्रियेव मुकुलीकृतमिन्दुमौलिः ॥ ७ ॥ अज्ञातसम्भवमनाकलितान्ववायं भिक्षुं कपालिनमवाससमद्वितीयम् । पूर्वं करग्रहणमङ्गलतो भवत्याः शम्भुं क एव बुबुधे गिरिराजकन्ये ॥ ८ ॥ चर्माम्बरं च शवभस्मविलेपनं च भिक्षाटनं च नटनं च परेतभूमौ । वेतालसंहतिपरिग्रहता च शम्भोः शोभां बिभर्ति गिरिजे तव साहचर्यात् ॥ ९ ॥ कल्पोपसंहरणकेलिषु पण्डितानि चण्डानि खण्डपरशोरपि ताण्डवानि । आलोकनेन तव कोमलितानि मातर्लास्यात्मना परिणमन्ति जगद्विभूत्यै ॥ १० ॥ जन्तोरपश्चिमतनोः सति कर्मसाम्ये

निःशेषपाशपटलच्छिदुरा निमेषात् । कल्याणि दैशिककटाक्ष-समाश्रयेण कारुण्यतो भवसि शाम्भववेददीक्षा ॥ ११ ॥ मुक्ताविभूषणवती नवविद्रुमाभा यच्चेतसि स्फुरसि तारकितेव सन्ध्या । एकः स एव भुवनत्रयसुन्दरीणां कन्दर्पतां व्रजति पञ्चशरीं विनापि ॥ १२ ॥ ये भावयन्त्यमृतवाहिभिरंशुजालै-राप्यायमानभुवनाममृतेश्वरीं त्वाम् । ते लङ्घयन्ति ननु मातरऽल-ङ्घनीयां ब्रह्मादिभिः सुरवरैरपि कालकक्ष्याम् ॥ १३ ॥ यः स्फाटिकाक्षगुणपुस्तककुण्डिकाढ्यां व्याख्यासमुद्यतकरां शरदि-न्दुशुभ्राम् । पद्मासनां च हृदये भवतीमुपास्ते मातः स विश्वक-वितार्किकचक्रवर्ती ॥ १४ ॥ बर्हावतंसयुतबर्बरकेशपाशां गुञ्जा-वलीकृतघनस्तनहारशोभाम् । श्यामां प्रवालवदनां सुकुमारहस्तां त्वामेव नौमि शबरीं शबरस्य जायाम् ॥ १५ ॥ अर्धेन किं नवलताललितेन मुग्धे क्रीतं विभोः परुषमर्धमिदं त्वयेति । आलीजनस्य परिहासवचांसि मन्ये मन्दस्मितेन तव देवि जडी-भवन्ति ॥ १६ ॥ ब्रह्माण्डबुद्बुदकदम्बकसंकुलोयं मायोदधि-र्विविधदुःखतरङ्गमालः । आश्चर्यमम्ब झटिति प्रलयं प्रयाति त्वद्ध्यानसन्ततिमहाबडवामुखाग्नौ ॥ १७ ॥ दाक्षायणीति कुटि-लेति गुहारणीति कात्यायनीति कमलेति कलावतीति । एका सती भगवती परमार्थतोऽपि सन्दृश्यसे बहुविधा ननु नर्तकीव ॥ १८ ॥ आनन्दलक्षणमनाहतनाम्नि देशे नादात्मना परिणतं तव रूपमीशे । प्रत्यङ्मुखेन मनसा परिचीयमानं शंसन्ति नेत्रसलिलैः पुलकैश्च धन्याः ॥ १९ ॥ त्वं चन्द्रिका शशिनि तिग्मरुचौ रुचिस्त्वं त्वं चेतनासि पुरुषे पवने बलं त्वम् । त्वं

स्वादुतासि सलिले शिखिनि त्वमूष्मा निःसारमेव निखिलं त्वदृते यदि स्यात् ॥ २० ॥ ज्योतींषि यद्दिवि चरन्ति यदन्तरिक्षं सूते पयांसि यदहिर्धरणीं च धत्ते । यद्वाति वायुरनलो यदुदर्चिरास्ते तत्सर्वमम्ब तव केवलमाज्ञयैव ॥ २१ ॥ सङ्को[illegible] मिच्छसि यदा गिरिजे तदानीं वाक्तर्कयोस्त्वमसि भूमिरनामरूपा । यद्वा विकासमुपयाति यदा तदानीं त्वन्नामरूपगणनाः सुकरीभवन्ति ॥ २२ ॥ भोगाय देवि भवतीं कृतिनः प्रणम्य भ्रूकिङ्करीकृतसरोजगृहासहस्राः । चिन्तामणिप्रचयकल्पितकेलिशैले कल्पद्रुमोपवन एव चिरं रमन्ते ॥ २३ ॥ हन्तुं त्वमेव भवसि त्वदधीनमीशे संसारतापमखिलं दयया पशूनाम् । वैकर्तनी किरणसंहतिरेव शक्ता घर्मं निजं शमयितुं निजयैव वृष्ट्या ॥ २४ ॥ शक्तिः शरीरमधिदैवतमन्तरात्मा ज्ञानं क्रिया करणमासनजालमिच्छा । ऐश्वर्यमायतनमावरणानि च त्वं किं तन्न यद्भवसि देवि शशाङ्कमौलेः ॥ २५ ॥ भूमौ निवृत्तिरुदिता पयसि प्रतिष्ठा विद्याऽनले मरुति शान्तिरतीतशान्तिः । व्योम्नीति याः किल कलाः कलयन्ति विश्वं तासां विदूरतरमम्ब पदं त्वदीयम् ॥ २६ ॥ यावत्पदं पदसरोजयुगं त्वदीयं नाङ्गीकरोति हृदयेषु जगच्छरण्ये । तावद्विकल्पजटिलाः कुटिलप्रकारास्तर्कग्रहाः समयिनां प्रलयं न यान्ति ॥ २७ ॥ यद्देवयानपितृयानविहारमेके कृत्वा मनः करणमण्डलसार्वभौमम् । याने निवेश्य तव कारणपञ्चकस्य पर्वाणि पार्वति नयन्ति निजासनत्वम् ॥ २८ ॥ स्थूलासु मूर्तिषु महीप्रमुखासु मूर्तेः कस्याश्चनापि तव वैभवमम्ब यस्याः । पत्या गिरामपि न शक्यत एव वक्तुं सासि स्तुता

किल मयेति तितिक्षितव्यम् ॥ २९ ॥ कालाग्निकोटिरुचिमम्ब षडऽध्वशुद्धावाप्लावनेषु भवतीममृतौघवृष्टिम् । श्यामां घनस्तन-तटां सकलीकृतौ च ध्यायन्त एव जगतां गुरवो भवन्ति ॥३०॥ निर्जम्परां कतिचिदम्बरमम्ब केचिदानन्दमेव कतिचित्कतिचिच्च मायाम् । त्वां विश्वमाहुरपरे वयमामनाम साक्षादपारकरुणां गुरुमूर्तिमेव ॥ ३१ ॥ कुवलयदलनीलं बर्बरस्निग्धकेशं पृथुतर-कुचभाराक्रान्तकान्तावलग्नम् । किमिह बहुभिरुक्तैस्त्वत्स्वरूपं परं नःसकलभुवनमातः सन्ततं सन्निधत्ताम् ॥ ३२ ॥ इति श्रीपञ्चस्तव्यां चतुर्थोऽम्बस्तवः ॥

---

## अथ सकलजननीस्तवः पञ्चमः ॥

ॐअज्ञानन्तो यान्ति क्षयमवशमन्योन्यकलहैरमी मायाग्रन्थौ तव परिलुठन्तः समयिनः । जगन्मातर्जन्मज्वरभयतमःकौमुदि ! वयं नमस्ते कुर्वाणाः शरणमुपयामो भगवतीम् ॥ १ ॥ वचस्त-र्कागम्यस्वरसपरमानन्दविभवप्रबोधाकाराय द्युतितुलितनीलो-त्पलरुचे । शिवस्याराध्याय स्तनभरविनम्राय सततं नमो यस्मै कस्मैचन भवतु मुग्धाय महसे ॥ २ ॥ लुठद्गुञ्जाहारस्तनभरनम-न्मध्यलतिकामुदञ्चद्धर्माम्भःकणगुणितनीलोत्पलरुचम् । शिवं पार्थत्राणप्रवणमृगयाकारगुणितं शिवामन्वग्यान्तीं शबरमहम-न्वेमि शबरीम् ॥३॥ मिथः केशाकेशिप्रधननिधनास्तर्कघटना ब-हुश्रद्धाभक्तिप्रणयविषयाश्चाप्तविधयः । प्रसीद प्रत्यक्षीभव गिरि-सुते देहि शरणं निरालम्बं चेतः परिलुठति पारिप्लवमिदम् ॥ ४ ॥ शुनां वा वह्नेर्वा खगपरिषदो वा यदशनं कदा केन केति

क्वचिदपि न कश्चित्कलयति । अमुष्मिन्विश्वासं विजहिहि ममाह्वाय वपुषि प्रपद्येथाश्चेतः सकलजननीमेव शरणम् ॥ ५ ॥ अनाद्यन्ताभेदप्रणयरसिकापि प्रणयिनी शिवस्यासीर्यत्त्वं परिणयविधौ देवि ! गृहिणी । सवित्री भूतानामपि यदुदभूः शैल-तनया तदेतत्संसारप्रणयनमहानाटकसुखम् ॥ ६ ॥ ब्रुवन्त्येके तत्त्वं भगवति सदन्ये विदुरसत्परे मातः प्राहुस्तव सदसदन्ये सुकवयः । परे नैतत्सर्वं समभिदधते देवि सुधियस्तदेतत्त्वन्माया विलसितमशेषं ननु शिवे ॥ ७ ॥ तडित्कोटिज्योतिर्द्युतिदलितषड्ग्रन्थिगहनं प्रविष्टं स्वाधारं पुनरपि सुधावृष्टिवपुषा । किमप्यष्टात्रिंशत्किरणसकलीभूतमनिशं भजे धाम श्यामं कुचभरनतं बर्बरकचम् ॥ ८ ॥ चतुष्पत्रान्तःषड्दलभगपुटान्तस्त्रिवलयस्फुरद्विद्युद्वह्निद्युमणिनियुताभद्युतियुते । षडश्रं भित्त्वादौ दशदलमथ द्वादशदशं कलाश्रं च द्व्यश्रं गतवति नमस्ते गिरिसुते ॥ ९ ॥ कुलं केचित्प्राहुर्वपुरकुलमन्ये तव बुधाः परे तत्सम्भेदं समभिदधते कौलमपरे । चतुर्णामप्येषामुपरि किमपि प्राहुरपरे महामाये तत्त्वं तव कथममी निश्चिनुमहे ॥१०॥ षडध्वारण्यानीं प्रलयरविकोटिप्रतिरुचा रुचा भस्मीकृत्य स्वपदकमलप्रह्वशिरसाम् । वितन्वानः शैवं किमपि वपुरिन्दीवररुचिः कुचाभ्यामानम्रः शिवपुरुषकारो विजयते ॥ ११ ॥ प्रकाशानन्दाभ्यामविदितचरीं मध्यपदवीं प्रविश्यैतद्द्वन्द्वं रविशशिसमाख्यं कवलयन् । प्रविश्योर्ध्वं नादं लयदहनभस्मीकृतकुलः प्रसादात्ते जन्तुः शिवमकुलमम्ब ! प्रविशति ॥ १२ ॥ प्रियङ्गुश्यामाङ्गीमरुणतरवासःकिसलयां समुन्मीलन्मुक्ताफल-

बहुलनेपथ्यकुसुमाम् । स्तनद्वन्द्वस्फारस्तबकनमितां कल्पलतिकां सकृद्ध्यायन्तस्त्वां दधति शिवचिन्तामणिपदम् ॥ १३ ॥ षडाधारावर्तैरपरिमितमन्त्रोर्मिपटलैश्चलन्मुद्राफेनैर्बहुविधलसद्दैवतझषैः क्रमस्रोतोभिस्त्वं वहसि परनादामृतनदी भवानि प्रत्यग्रा शिवचिदमृताब्धिप्रणयिनी ॥ १४ ॥ महीपाथोवह्निश्वसनवियदात्मेन्दुरविभिर्वपुर्भिर्ग्रस्तांशैरपि तव कियानम्ब महिमा । अमून्यालोक्यन्ते भगवति ? न कुत्राप्यणुतरामवस्थां प्राप्तानि त्वयि तु परमव्योमवपुषि ॥ १५ ॥ मनुष्यास्तिर्यञ्चो मरुत इति लोकत्रयमिदं भवाम्भोधौ मग्नं त्रिगुणलहरीकोटिलुठितम् । कटाक्षश्चेदत्र क्वचन तव मातः करुणया शरीरी सद्योयं व्रजति परमानन्दतनुताम् ॥ १६ ॥ कलां प्रज्ञामाद्यां समयमनुभूतिं समरसां गुरुं पारम्पर्यं विनयमुपदेशं शिवकथाम् । प्रमाणं निर्वाणं परममनुभूतिं परगुहां विधिं विद्यामाहुः सकलजननीमेव मुनयः ॥ १७ ॥ प्रलीने शब्दौघे तदनु विरते बिन्दुविभवे ततस्तत्त्वे चाष्टध्वनिभिरनुपाधिन्युपरते । श्रिते शाक्ते पर्वण्यनुकलितचिन्मात्रगहनां स्वसंवित्तिं योगी रसयति शिवाख्यां परतनुम् ॥ १८ ॥ परानन्दाकारां निरवधिशिवैश्वर्यवपुषं निराकारज्ञानप्रकृतिमनवच्छिन्नकरुणाम् । सवित्रीं भूतानां निरतिशयधामास्पदपदां भवो वा मोक्षो वा भवतु भवतीमेव भजताम् ॥ १९ ॥ जगत्काये कृत्वा तमपि हृदये तच्च पुरुषे पुमांसं बिन्दुस्थं तमपि परनादाख्यगहने । तदेतज्ज्ञानाख्ये तदपि परमानन्दविभवे महाव्योमाकारे त्वदनुभवशीलो विजयते ॥ २० ॥ विधे विद्ये वेद्ये विविधसमये वेदजननि ? विचित्रे विश्वाद्ये

विनयसुलभे वेदगुलिके । शिवाङ्के शीलस्थे शिवपदवदान्ये शिवनिधे शिवे मातर्मह्यं त्वयि वितर भक्तिं निरुपमाम् ॥२१॥ विधेर्मुण्डं हृत्वा यदकुरुत पात्रं करतले हरिं शूलप्रोतं यदऽग-मयदंसासरणताम् । अलंचक्रे कण्ठं यदपि गरलेनाम्ब गि[illegible] शिवस्थायाः शक्तेस्तदिदमखिलं ते विलसितम् ॥ २२ ॥ विरि-ञ्च्याख्या मातः सृजसि हरिसंज्ञा त्वमवसि त्रिलोकीं रुद्राख्या हरसि विदधासीश्वरदशाम् । भवन्ती सादाख्या शिवयसि च पाशौघदलिनी त्वमेवैकाऽनेका भवसि कृतभेदैर्गिरिसुते ॥२३॥ मुनीनां चेतोभिः प्रमृदितकषायैरपि मनागऽशक्ये संस्प्रष्टुं चकितचकितैरम्ब सततम् । श्रुतीनां मूर्धानः प्रकृतिकठिनाः कोमलतरे कथं ते विन्दन्ते पदकिसलये पार्वति पदम् ॥२४॥ तडिद्वल्लीं नित्याममृतसरितं पाररहितां मलोत्तीर्णां ज्योत्स्नां प्रकृतिमगुणग्रन्थिगहनाम् । गिरां दूरां विद्यामऽवनतकुचां विश्वजननीमपर्यन्तां लक्ष्मीमभिदधति सन्तो भगवतीम् ॥२५॥ शरीरं क्षित्यम्भःप्रभृतिरचितं केवलमिदं सुखं दुःखं चायं कलयति पुमांश्चेतन इति । स्फुटं जानानोऽपि प्रभवति न देही रहयितुं शरीराहंकारं तव समयबाह्यो गिरिसुते ॥ २६ ॥ पिता माता भ्राता सुहृदऽनुचरः सद्म गृहिणी वपुः पुत्रो मित्रं धनमपि यदा मां विजहति । तदा मे भिन्दाना सपदि भय-मोहान्धतमसां महाज्योत्स्ने मातर्भव करुणया सन्निधिकरी २७ सुता दक्षस्यादौ किल सकलमातस्त्वमुदभूः सदोषं तं हित्वा तदनु गिरिराजस्य तनया । अनाद्यन्ता शम्भोरपृथगपि शक्ति-र्भगवती विवादाज्जायासीत्यहह चरितं वेत्ति तव कः ॥ २८ ॥

कणास्त्वद्दीप्तीनां रविशशिकृशानुप्रभृतयः परं ब्रह्म क्षुद्रं तव नियतमाऽनन्दकणिका । शिवादिक्षित्यन्तं त्रिवलयतनोः सर्व-मुदरे तवास्ते भक्तस्य स्फुरसि हृदि चित्रं भगवति ॥२९॥ त्वया ...नीते रचयति भवत्यैव सततं त्वयैवेच्छत्यम्ब ! त्वमसि निखिला यस्य तनवः । गतः साम्यं शम्भुर्वहति परमं व्योम भवती तथाप्येवं हित्वा विहरति शिवस्येति किमिदम् ॥ ३० ॥ पुरः पश्चादन्तर्बहिरपरिमेयं परिमितं परं स्थूलं सूक्ष्मं सकुल-मकुलं गुह्यमगुहम् । दवीयो नेदीयः सदसदिति विश्वं भगवतीं सदा पश्यन्त्याज्ञां वहसि भुवनक्षोभजननीम् ॥ ३१ ॥ मयूखाः पूष्णीव ज्वलन इव तद्दीप्तिकणिकाः पयोधौ कल्लोलप्रतिहत-महिम्नीव पृषतः । उदेत्योदेत्याम्ब त्वयि सह निजैस्तात्त्विककुलैर्भजन्ते तत्त्वौघाः प्रशममनुकल्पं परवशाः ॥ ३२ ॥ विधुर्विष्णुर्ब्रह्मा प्रकृतिरणुरात्मा दिनकरः स्वभावो जैनेन्द्रः सुगतमुनि-राकाशमनिलः । शिवः शक्तिश्चेति श्रुतिविषयतां तामुपगतां विकल्पैरेभिस्त्वामऽभिदधति सन्तो भगवतीम् ॥ ३३ ॥ प्रविश्य स्वं मार्गं सहजदयया दैशिकदृशा षडध्वध्वान्तौघच्छिदुरगण-नातीतकरुणाम् । परानन्दाकारां सपदि शिवयन्तीमपि तनुं स्वमात्मानं धन्याश्चिरमुपलभन्ते भगवतीम् ॥ ३४ ॥ शिवस्त्वं शक्तिस्त्वं त्वमसि समया त्वं समयिनी त्वमात्मा त्वं दीक्षा त्वमयमणिमादिर्गुणगणः । अविद्या त्वं विद्या त्वमसि निखिलं त्वं किमपरं पृथक्तत्त्वं त्वत्तो भगवति न वीक्षामह इमे ॥३५॥ असंख्यैः प्राचीनैर्जननि जननैः कर्मविलयाद्गते जन्मन्यन्तं गुरुवपुषमासाद्य गिरिशम् । अवाप्याज्ञां शैवीं क्रमतनुरपि त्वां

विदितवान्नयेयं त्वत्पूजास्तुतिविरचनेनैव दिवसान् ॥ ३६ ॥ यत्षट्पत्रं कमलमुदितं तस्य या कर्णिकाख्या योनिस्तस्याः प्रथितमुदरे यत्तदोङ्कारपीठम् । तस्मिन्नऽन्तःकुचभरनतां कुण्डलीतः प्रवृत्तां श्यामाकारां सकलजननीं सन्ततं भावयामि ॥ ३७ ॥ भुवि पयसि कृशानौ मारुते खे शशाङ्के सवितरि यजमानेऽप्यष्टधा शक्तिरेका । वहति कुचभराभ्यां या विनम्रापि विश्वं सकलजननि सा त्वं पाहि मामित्यवश्यम् ॥ ३८ ॥ इति पञ्चस्तव्यां सकलजननीस्तवः पञ्चमः ॥ समाप्ता चेयं पञ्चस्तवी ।

---

## अथ शङ्कराचार्यकृता सौन्दर्यलहरी ॥

ॐ नमश्चिच्छक्त्यै ॥ शिवः शिक्त्या युक्तो यदि भवति शक्तः प्रभवितुं न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि । अतस्त्वामाराध्यां हरिहरविरिञ्च्यादिभिरपि प्रणन्तुं स्तोतुं वा कथमकृतपुण्यः प्रभवति ॥ १ ॥ तनीयांसं पांसुं तव चरणपङ्केरुहभवं विरिञ्चिः संचिन्वन्विरचयति लोकानऽविकलम् । वहत्येनं शौरिः कथमपि सहस्रेण शिरसां हरः संक्षुभ्यैनं भजति भसितोद्धूलनविधिम् ॥ २ ॥ अविद्यानामऽन्तस्तिमिरमिहिरोद्दीपनकरी जडानां चैतन्यस्तवकमकरन्दस्रुतिसिरा । दरिद्राणां चिन्तामणिगुणनिका जन्मजलधौ निमग्नानां दंष्ट्रा मुररिपुवराहस्य भवती ॥ ३ ॥ त्वदन्यः पाणिभ्यामभयवरदो दैवतगणस्त्वमेका नैवासि प्रकटितवराभीत्यभिनया । भयात्त्रातुं दातुं फलमपि च वाञ्छासमधिकं शरण्ये लोकानां तव हि

चरणावेव निपुणौ ॥ ४ ॥ हरिस्त्वामाराध्य प्रणतजनसौभाग्यजननीं पुरा नारी भूत्वा पुररिपुमपि क्षोभमनयत् । स्मरोपि त्वां नत्वा रतिनयनलेह्येन वपुषा मुनीनामप्यन्तः प्रभवति हि मोहाय महताम् ॥ ५ ॥ धनुः पौष्पं मौर्वी मधुकरमयी पञ्च विशिखा वसन्तः सामन्तो मलयमरुदाऽयोधनरथः । तथाप्येकः सर्वं हिमगिरिसुते कामपि कृपामपाङ्गात्ते लब्ध्वा जगदिदमनङ्गो विजयते ॥ ६ ॥ क्वणत्काञ्चीदामा करिकलभकुम्भस्तनभरा परिक्षीणा मध्ये परिणतशरच्चन्द्रवदना । धनुर्बाणान्पाशं सृणिमपि दधाना करतलैः पुरस्तादाऽऽस्तां नः पुरमथितुराहोपुरुषिका ॥ ७ ॥ सुधासिन्धोर्मध्ये सुरविटपिवाटीपरिवृते मणिद्वीपे नीपोपवनवति चिन्तामणिगृहे । शिवाकारे मञ्चे परमशिवपर्यङ्कनिलयां भजन्ति त्वां धन्याः कतिचन चिदानन्दलहरीम् ॥ ८ ॥ महीं मूलाधारे कमपि मणिपूरे हुतवहंस्थितं स्वाधिष्ठाने हृदि मरुतमाकाशमुपरि । मनोपि भ्रूमध्ये सकलमपि भित्त्वा कुलपथं सहस्रारे पद्मे सह रहसि पत्या विहरसि ॥ ९ ॥ सुधाधारासारैश्चरणयुगलान्तर्विगलितैः प्रपञ्चं सिञ्चन्ती पुनरपि रसाम्नायमहसा । अवाप्य स्वां भूमिं भुजगनिभमध्युष्टवलयं स्वमात्मानं कृत्वा स्वपिषि कुलकुण्डे कुहरिणि ॥१०॥ चतुर्भिः श्रीकण्ठैः शिवयुवतिभिः पञ्चभिरथो प्रभिन्नाभिः शम्भोर्नवभिरिति मूलप्रकृतिभिः । त्रयश्चत्वारिंशद्वसुदलकलास्रत्रिवलयत्रिरेखाभिः सार्धं तव भुवनकोणाः परिणताः ॥ ११ ॥ त्वदीयं सौन्दर्यं तुहिनगिरिकन्ये तुलयितुं कवीन्द्राः कल्पन्ते कथमपि विरिञ्चिप्रभृतयः । यदालोक्यौ-

त्सुक्यादमरललना यान्ति मनसा तपोभिर्दुष्प्रापामपि गिरिश-सायुज्यपदवीम् ॥ १२ ॥ नरं वर्षीयांसं नयनविरसं नर्मसु जडं तवापाङ्गालोके पतितमनुधावन्ति शतशः । गलद्वेणी बन्धाः कुचकलशविस्रस्तसिचया हठात्त्रुट्यत्काञ्च्यो वि[illegible] दुकूला युवतयः ॥ १३ ॥ क्षितौ षट्पञ्चाशद्द्विसमधिकपञ्चा-शदुदके हुताशे द्वाषष्टिश्चतुरधिकपञ्चाशदनिले । दिवि द्विःष-ट्त्रिंशन्मनसि च चतुःषष्टिरिति ये मयूखास्तेषामप्युपरि तव पादाम्बुजयुगम् ॥ १४ ॥ शरज्ज्योत्स्नाशुभ्रां शशियुतजटा-जूटमुकुटां वरत्रासत्राणस्फटिकघुटिकापुस्तककराम् । सकृन्नत्वा न त्वां कथमिव सतां सन्निदधते मधुक्षीरद्राक्षामधुरिमधुरीणा भणितयः ॥ १५ ॥ कवीन्द्राणां चेतःकमलवनबालातपरुचिं भजन्ते ये सन्तः कतिचिदरुणामेव भवतीम् । विरिञ्चिप्रेयस्या-स्तरलतरशृङ्गारलहरीगभीराभिर्वाग्भिर्विदधति सतां रञ्जनममी ॥ १६ ॥ तनुच्छायाभिस्ते तरुणतरणिश्रीसरणिभिर्दिवं सर्वा-मुर्वीमरुणिमनिमग्नां स्मरति यः । भवन्त्यस्य त्रस्यद्वनहरिणशा-लीननयनाः सहोर्वश्या वश्याः कतिकति न गीर्वाणगणिकाः ॥ १७ ॥ मुखं बिन्दुं कृत्वा कुचयुगमधस्तस्य तदधो हरार्धं ध्यायेद्यो हरमहिषि ते मन्मथकलाम् । स सद्यः संक्षोभं नयति वनिता इत्यतिलघु त्रिलोकीमप्याशु भ्रमयति रवीन्दुस्तनयुगाम् ॥ १८ ॥ किरन्तीमङ्गेभ्यः किरणनिकुरम्बामृतरसं हृदि त्वामाधत्ते हिमकरशिलामूर्तिमिव यः । स सर्पाणां दर्पं शमयति शकुन्ताधिप इव ज्वरप्लुष्टं दृष्ट्या सुखयति सुधासारसिरया ॥ १९ ॥ तडिल्लेखातन्वीं तपनशशिवैश्वानरमयीं निषण्णां षण्णामप्युपरि

कमलानां तव कलाम् । महापद्माटव्यां मृदितमलमायेन मनसा
महान्तः पश्यन्तो दधति परमाह्लादलहरीम् ॥ २० ॥ सवि-
[illegible]भिर्वाचां शशिमणिशिलाभङ्गिरुचिभिर्वशिन्याद्याभिस्त्वां सह
[illegible]नानं संचिन्तयति यः । स कर्ता काव्यानां भवति कविता-
भङ्गिसुभगैर्वचोभिर्वाग्देवीवदनकमलामोदमधुरैः ॥ २१ ॥
भवानि त्वं दासे मयि वितर दृष्टिं सकरुणामिति स्तोतुं वा-
ञ्छन्कथयति भवानि त्वमिति यः । तदैव त्वं तस्मै दिशसि नि-
जसायुज्यपदवीं मुकुन्दब्रह्मेन्द्रस्फुटमुकुटनीराजितपदाम् ॥२२॥
त्वया हृत्वा वामं वपुरपरितृप्तेन मनसा शरीरार्धं शम्भोरपरमपि
शङ्के हृतमभूत् । तथाहि त्वद्रूपं सकलमरुणाभं त्रिनयनं
कुचाभ्यामानम्रं कुटिलशशिचूडालमुकुटम् ॥ २३ ॥ जगत्सूते
धाता हरिरवति रुद्रः क्षिपयते तिरस्कुर्वन्नेतत्स्वमपि वपुरीशस्ति-
रयति । सदापूर्वः सर्वं तदिदमनुगृह्णाति च शिवस्तवाज्ञामालम्ब्य
क्षणचलितयोर्भ्रूलतिकयोः ॥ २४ ॥ त्रयाणां देवानां त्रिगुण-
जनितानां परशिवे भवेत्पूजा पूजा तव चरणयोर्या विरचिता ।
तथाहि त्वत्पादोद्वहनमणिपीठस्य निकटे स्थिता ह्येते शश्वन्मु-
कुलितकरोत्तंसमुकुटाः ॥ २५ ॥ विरिञ्चिः पञ्चत्वं व्रजति हरि-
राप्नोति विरतिं विनाशं कीनाशो भजति धनदो याति निधनम् ।
वितन्द्रा माहेन्द्री विततिरपि संमीलति दृशां महासंहारेऽस्मि-
न्विलसति सति त्वत्पतिरसौ ॥ २६ ॥ जपो जल्पः शिल्पं
सकलमपि मुद्राविरचनं गतिः प्रादक्षिण्यक्रमणमऽशनाद्याहु-
तिविधिः । प्रणामः संवेशः सुखमखिलमात्मार्पणदृशा सपर्या
पर्यायस्तव भवतु यन्मे विलसितम् ॥ २७ ॥ ददाने दीनेभ्यः

श्रियमनिशमाशानुसदृशीममन्दं सौन्दर्यप्रकरमकरन्दं विकिरति। तवास्मिन्मन्दारस्तवकसुभगे यातु चरणे निमज्जन्मज्जीवः करणचरणैः षट्चरणताम् ॥ २८ ॥ सुधामप्यास्वाद्य प्रतिभयजरामृत्युहरणीं विपद्यन्ते विश्वे विधिशतमुखाद्या दिविषदः । करालं यत्क्ष्वेडं कवलितवतः कालकलना न शम्भोस्तन्मूलं जननि तव ताटङ्कमहिमा ॥ २९ ॥ किरीटं वैरिञ्चं परिहर पुरः कैटभभिदः कठोरे कोटीरे स्खलसि जहि जम्भारिमुकुटम् । प्रणम्रेष्वेतेषु प्रसभमभियातस्य भवनं हरस्याभ्युत्थाने तव परिजनोक्तिर्विजयते ॥ ३० ॥ चतुःषष्ट्या तन्त्रैः सकलमभिसन्धाय भुवनं स्थितस्तत्तत्सिद्धिप्रसवपरतन्त्रैः पशुपतिः । पुनस्त्वन्निर्बन्धादऽखिलपुरुषार्थैकघटनात्स्वतन्त्रं ते तन्त्रं क्षितितलमऽवातीतरदिदम् ॥ ३१ ॥ शिवः शक्तिः कामः क्षितिरथ रविः शीतकिरणः स्मरो हंसः शक्रस्तदनु च परामारहरयः । अमी हृल्लेखाभिस्तिसृभिरवसानेषु घटिता भजन्ते वर्णास्ते तव जननि नामावयवताम् ॥ ३२ ॥ स्मरं योनिं लक्ष्मीं त्रितयमिदमादौ तव मनोर्निधायैके नित्ये निरवधिमहाभोगरसिकाः । जपन्ति त्वां चिन्तामणिगुणनिबद्धाक्षवलयाः शिवाग्नौ जुह्वन्तः सुरभिघृतधाराहुतिशतैः ॥ ३३ ॥ शरीरं त्वं शम्भोः शशिमिहिरवक्षोरुहयुगं तवात्मानं मन्ये भगवति नवात्मानमनघम् । अतः शेषः शेषीत्ययमुभयसाधारणतया स्थितः सम्बन्धो वां समरसपदानन्दपरयोः ॥ ३४ ॥ मनस्त्वं व्योम त्वं मरुदसि मरुत्सारथिरसि त्वमापस्त्वं भूमिस्त्वयि परिणतायां नहि परम् । त्वमेव स्वात्मानं परिणमयितुं विश्ववपुषा चिदानन्दा-

कारं हरमहिषिभावेन विभृषे ॥ ३५ ॥ तवाज्ञाचक्रस्थं तपनश-
शिकोटिद्युतिधरं परं शम्भुं वन्दे परिमिलितपार्श्वं परचिता ।
यमाराध्यन्भक्त्या रविशशिशुचीनामविषये निरालोके लोको
[illegible] हि भालोकभवने ॥ ३६ ॥ विशुद्धौ ते शुद्धस्फटिक-
सदृशं व्योमजनकं शिवं सेवे देवीमपि शिवसमानव्यसनि-
नीम् । ययोः कान्त्या यात्या शशिकिरणसारूप्यसरणिर्विधू-
तान्तर्ध्वान्ता विलसति चकोरीव जगती ॥ ३७ ॥ समुन्मील-
त्संवित्कमलमकरन्दैकरसिकं भजे हंसद्वन्द्वं किमपि महतां
मानसचरम् । यदालापादष्टादशगुणितविद्यापरिणतिर्यदादत्ते
दोषाद्गुणमखिलमद्भ्यः पय इव ॥ ३८ ॥ तव स्वाधिष्ठाने हुतव-
हमधिष्ठाय निभृतं तमीडे संवर्तं जननि महतीं तां च समयाम् ।
यदालोके लोकान्दहति महति क्रोधकलिले दयार्द्रा त्वदृष्टिः
शिशिरमुपचारं रचयति ॥ ३९ ॥ तडित्वन्तं शक्त्या तिमिर-
परिपन्थिस्फुरणया स्फुरन्नानारत्नाभरणपरिणद्धेन्द्रधनुषम् । तव
श्यामं मेघं कमपि मणिपूरैकशरणं निषेवे वर्षन्तं हरमिहिरतप्तं
त्रिभुवनम् ॥ ४० ॥ तवाधारे मूले सह समयया लास्यपरया
नवात्मानं वन्दे नवरसमहाताण्डवनटम् । उभाभ्यामेताभ्यामु-
दयविधिमुद्दिश्य दयया सनाथाभ्यां जज्ञे जनकजननीमज्जग-
दिदम् ॥ ४१ ॥ गतैर्माणिक्यत्वं गगणमणिभिः सान्द्रघटितं
किरीटं ते हैमं हिमगिरिसुते कीर्तयति यः । सनीडे यच्छाया-
च्छुरणशबलं चन्द्रशकलं धनुः शौनासीरं किमिदमिति बध्नाति
धिषणाम् ॥ ४२ ॥ धुनोतु ध्वान्तं नस्तुलितदलितेन्दीवरवनं
घनस्निग्धं श्लक्ष्णं चिकुरनिकुरम्बं तव शिवे । यदीयं सौरभ्यं

सहजमुपलब्धुं सुमनसो वसन्त्यस्मिन्मन्ये बलमथनवाटीविटपिनाम् ॥ ४३ ॥ वहन्ती सिन्दूरं प्रबलकवरीभारतिमिरत्विषां वृन्दैर्वन्दीकृतमिव नवीनार्ककिरणम् । तनोतु क्षेमं न[illegible] नसौरभ्यलहरीपरीवाहस्रोतः सरणिरिव सीमन्तसरणिः ॥४४॥ अरालैः स्वाभाव्यादऽलिकुलहसश्रीभिरलकैः परीतं ते वक्त्रं परिहसति पङ्केरुहरुचिम् । दरस्मेरे यस्मिन्दशनरुचिकिञ्जल्करुचिरे सुगन्धौ माद्यन्ति स्मरमथनचक्षुर्मधुलिहः ॥ ४५ ॥ ललाटं लावण्यद्युतिविमलमाभाति तव यद्द्वितीयं तन्मन्ये मुकुटशशिखण्डस्य शकलम् । विपर्यासन्यासादुभयकृतसन्धानघटितः सुधालेपस्फूर्तिः परिणमति राकाहिमकरः ॥ ४६ ॥ भ्रुवौ भुग्ने किंचिद्भुवनभयभङ्गव्यसनिनि त्वदीये नेत्राभ्यां मधुकररुचिभ्यां धृतगुणे । धनुर्मन्ये सव्येतरकरगृहीतं रतिपतेः प्रकोष्ठे मुष्टौ च स्थगयति निगूढान्तरमिदम् ॥ ४७ ॥ अहः सूते सव्यं तव नयनमर्कात्मकतया त्रियामां वामं ते सृजति रजनीनायकतया । तृतीया दृष्टिस्ते दरदलितहेमाम्बुजरुचिः समाधत्ते सन्ध्यां दिवसनिशयोरन्तरचरीम् ॥ ४८ ॥ विशाला कल्याणी स्फुटरुचिरयोध्या कुवलयैः कृपाधारापारा किमपि मधुरा भोगवतिका । अवन्ती दृष्टिस्ते बहुनगरविस्तारविजया ध्रुवं तत्तन्नामव्यवहरणयोग्या विजयते ॥ ४९ ॥ कवीनां सन्दर्भस्तवकमकरन्दैकभरितं कटाक्षव्याक्षेपभ्रमरकलभौ कर्णयुगलम् । अमुञ्चन्तौ दृष्ट्वा तव नवरसास्वादतरलावसूयासंसर्गादऽलिकनयनं किञ्चिदऽरुणम् ॥ ५० ॥ शिवे शृङ्गारार्द्रा तदितरजने कुत्सनपरा सरोषा गङ्गायां गिरिशचरिते विस्मय-

वती । हराहिभ्यो भीता सरसिरुहसौभाग्यजननी सखीषु स्मेरा ते मयि जयति दृष्टिः सकरुणा ॥ ५१ ॥ गते कर्णाभ्यर्णं गरुत इव पक्ष्माणि दधती पुरांभेत्तुश्चित्तप्रशमरसविद्रावण-फले इमे नेत्रे गोत्राधरपतिकुलोत्तंसकलिके तवाकर्णाकृष्ट-स्मरशरविलासं कलयतः ॥ ५२ ॥ विभक्तत्रैवर्ण्यंव्यतिकरण-नीलाञ्जनतया विभाति त्वन्नेत्रत्रितयमिदमीशानदयिते । पुनः स्रष्टुं देवान्द्रुहिणहरिरुद्रानुपरतान्रजः सत्त्वं बिभ्रत्तम इति गुणानां त्रयमिव ॥ ५३ ॥ पवित्रीकर्तुं नः पशुपतिपराधीनहृदये दयामित्रैर्नेत्रैररुणधवलश्यामरुचिभिः । नदः शोणो गङ्गा तपनतनयेति ध्रुवमिमं त्रयाणां तीर्थानामुपनयसि सम्भेदमनघे ॥ ५४ ॥ तवापर्णे कर्णेजपनयनपैशुन्यचकिता निलीयन्ते तोये नियतमनिमेषाः शफरिकाः । इयं च श्रीर्बद्धच्छेदपुटकपाटंकुवलयं जहाति प्रत्यूषे निशि च विघटय्य प्रविशति ॥ ५५ ॥ निमेषोन्मेषाभ्यां प्रलयमुदयं याति जगती तवेत्याहुः सन्तो धरणिधरराजस्य तनये । त्वदुन्मेषाज्जातं जगदिदमशेषं प्रलयतः परित्रातुं शङ्के परिहृतनिमेषास्तव दृशः ॥ ५६ ॥ दृशा द्राघीयस्या दरदलितनीलोत्पलरुचा दवीयांसं दीनं स्नपय कृपया मामपि शिवे । अनेनायं धन्यो भवति नच ते हानिरियता वने वा हर्म्ये वा समकरनिपातो हिमकरः ॥ ५७ ॥ अरालं ते पालीयुगलमऽगराजस्य तनये न केषामाधत्ते कुसुमशरकोदण्डकुतकम् । तिरश्चीने यत्र श्रवणपथमुल्लंघ्य विलसन्नपाङ्गव्यासङ्गो दिशति शरसन्धानधिषणाम् ॥ ५८ ॥ स्फुरद्गण्डाभोगप्रतिफलितताटङ्कयुगलं

चतुश्चक्रं मन्ये तव मुखमिदं मन्मथरथम् । यमारुह्य द्रुह्यत्यवनिरथमर्केन्दुचरणं महावीरो मारः प्रमथपतये स्वं जितवते ॥ ५९ ॥ सरस्वत्याः सूक्तीरमृतलहरीः कौशलहरीं पिबन्त्याः शर्वाणि श्रवणचषकाभ्यामविरतम् । चमत्का[illegible] चलितशिरसः कुण्डलगणो फणत्कारैस्तारैः प्रतिवचनमाचष्ट इव ते ॥ ६० ॥ असौ नासावंशस्तुहिनगिरिवंशध्वजपटस्त्वदीयो नेदीयः फलतु फलमस्माकमुचितम् । वहन्नन्तर्मुक्ताः शिशिरतरनिःश्वासघटिताः समृद्ध्या यस्तासां बहिरपिच मुक्तामणिधरः ॥ ६१ ॥ प्रकृत्या रक्तायास्तव सुदति दन्तच्छदरुचेः प्रवक्ष्ये सादृश्यं जनयतु फलं विद्रुमलता । क बिम्बं त्वद्बिम्बप्रतिफलनलाभादरुणितं तुलामध्यारोढुं कथमिव न लज्जेत कलया ॥ ६२ ॥ सितज्योत्स्नाजालं तव वदनचन्द्रस्य पिबतां चकोराणामासीदतिरसितया चञ्चुजडिमा । अतस्ते शीतांशोरमृतलहरीमऽम्लरुचयः पिबन्ति स्वच्छन्दं निशिनिशि भृशं काञ्जिकधिया ॥ ६३ ॥ अविश्रान्तं पत्युर्गुणगणकथाम्रेडनजडा जपापुष्पच्छाया तव जननि जिह्वा जयति सा । यदग्रासीनायाः स्फटिकदृशदच्छच्छविरुचिः सरस्वत्या मूर्तिः परिणमति माणिक्यवपुषा ॥ ६४ ॥ रणे जित्वा दैत्यानपहतशिरस्त्रैः कवचिभिर्निवृत्तैश्चण्डांशुत्रिपुरहरनिर्माल्यविमुखैः । विरिञ्चीन्द्रोपेन्द्रैः शशिशिशिरकर्पूरधवला विलिप्यन्ते मातस्तव वदनताम्बूलशकलाः ॥ ६५ ॥ विपञ्च्या गायन्ती विविधमवदातं पशुपतेस्त्वयारब्धे वक्तुं स्खलितवचसा साधुवचने । त्वदीयैर्माधुर्यैरपलपिततन्त्रीकलरवां निजां वीणां

वाणी निचुलयति चोलेन निभृतम् ॥ ६६ ॥ कराग्रेण स्पृष्टं तुहिनगिरिणा वत्सलतया गिरीशेनोदस्तं मुहुरधरपानाकुलतया । [illegible] ग्राह्यं शम्भोर्मुखमुकुरवृन्तं गिरिसुते कथङ्कारं ब्रूमस्तव [illegible]पम्यरहितम् ॥ ६७ ॥ भुजाश्लेषान्नित्यं पुरदमयितुः कण्ठकवती तव ग्रीवा धत्ते मुखकमलनालश्रियमियम् । स्वतः श्वेता कालागुरुबहलजम्बालमलिना मृणालीलालित्यं वहति यदधो हारलतिका ॥ ६८ ॥ गले रेखास्तिस्रो गतिगमकगीतैकनिपुणे विवाहव्यानद्धत्रिगुणगुणसंख्याप्रतिभुवः । विराजन्ते नानाविधमधुररागाकरभुवां त्रयाणां ग्रामाणां स्थितिनियमसीमान इव ते ॥ ६९ ॥ मृणालीमृद्वीनां तव भुजलतानां चतसृणां चतुर्भिः सौन्दर्यं सरसिजभवः स्तौति वदनैः । नखेभ्यः सन्त्रस्यन्प्रथमदमनादन्धकरिपोश्चतुर्णां वक्त्राणां सममभयदानार्पणधिया ॥ ७० ॥ नखानामुद्द्योतैर्नवनलिनरागं विहसतां कराणां ते कान्तिं कथय कथयामः कथमुमे । कदाचिद्वा साम्यं भजतु कलया हन्त कमलं यदि क्रीडल्लक्ष्मीचरणतललाक्षारुणदलम् ॥ ७१ ॥ समं देवि स्कन्दद्विपवदनपीतं स्तनयुगं तवेदं नः खेदं हरतु सततं प्रस्नुतमुखम् । यदालोक्याशङ्काकुलितहृदयो हासजनकः स्वकुम्भौ हेरम्बः परिमृशति हस्तेन झटिति ॥ ७२ ॥ अमू ते वक्षोजावमृतरसमाणिक्यकलशौ न सन्देहस्पन्दो नगपतिपताके मनसि नः । पिबन्तौ तौ यस्मादविदितवधूसङ्गमरसौ कुमारावद्यापि द्विरदवदनक्रौञ्चदमनौ ॥ ७३ ॥ वहत्यम्ब स्तम्बेरमवदनकुम्भप्रकृतिभिः समारब्धां मुक्तामणिभिरमलां हारलतिकाम् । कुचाभोगो

बिम्बाधररुचिभिरन्तः शबलितां प्रतापव्यामिश्रां पुरविजयिनः कीर्तिमिव ते ॥ ७४ ॥ तव स्तन्यं मन्ये तुहिनगिरिकन्ये हृदयतः पयःपारावारः परिवहति सारस्वत इति । दया... द्रविडशिशुरासाद्य तव यत्कवीनां प्रौढानामजनि कमनी... कवयिता ॥ ७५ ॥ हरक्रोधज्वालावलिभिरवलीढेण वपुषा गभीरे ते नाभीसरसि कृतजम्पो मनसिजः । समुत्तस्थौ तस्मा-द्चलतनये धूमलतिका जनस्तां जानीते तव जननि रोमावलि-रिति ॥ ७६ ॥ यदेतत्कालिन्दीतनुतरतरङ्गाकृति शिवे कृशे मध्ये किंचिज्जननि तव तद्भाति सुधियाम् । विमर्दादन्योन्यं कुचकलशयोरन्तरगतं तनूभूतं व्योम प्रविशदिव नाभीकुहरि-णीम् ॥ ७७ ॥ स्थिरो गङ्गावर्तः स्तनकमलरोमावलिलता जलावालं कुण्डं कुसुमशरतेजोहुतभुजः । रतेर्लीलागारं किमपि तव नाभीति गिरिजे बिलद्वारं सिद्धेर्गिरिशनयनानां विजयते ॥ ॥ ७८ ॥ निसर्गक्षीणस्य स्तनयुगभरेण क्लमजुषो नमन्मूर्तेर्नाभौ वलिषु शनकैरुद्यत इव । चिरं ते मध्यस्य त्रुटिततटिनीतीरत-रुणा समावस्थास्थेम्नो भवतु कुशलं शैलतनये ॥ ७९ ॥ कुचौ सद्यः स्विद्यत्तटघटितकर्पासभिदुरौ कषन्तौ दोर्मूले कनककल-शाभौ कलयता । तव त्रातुं भङ्गादलमितिविलग्नं तनुभुवा त्रिधानद्धं देवि त्रिवलिलवलीवल्लिभिरिव ॥ ८० ॥ गुरुत्वं विस्तारं क्षितिधरपतिः पार्वति निजान्नितम्बादाच्छिद्य त्वयि हरणरूपेण निदधे । अतस्ते विस्तीर्णो गुरुरयमशेषां वसुमतीं नितम्बप्राग्भारः स्थगयति लघुत्वं नयति च ॥ ८१ ॥ करी-न्द्राणां शुण्डाकनककदलीकाण्डपटलीमुभाभ्यामूरूभ्यामुभयमपि

निर्जित्य भवती । सुवृत्ताभ्यां पत्युः प्रणतिकठिनाभ्यां गिरिसुते विजिग्ये जानुभ्यां विबुधकरिकुम्भद्वयमपि ॥ ८२ ॥ पराजेतुं रुद्रं द्विगुणशरगर्भौ गिरिसुते निषङ्गौ जङ्घे ते विषमविशिखो बाढमकृत । यदग्रे लक्ष्यन्ते दशशरफलाः पादयुगलीनखाग्रच्छद्मानः सुरमुकुटशाणौघनिशिताः ॥ ८३ ॥ श्रुतीनां मूर्धानो दधति तव यौ शेखरतया ममाप्येतौ मातः शिरसि दयया धेहि चरणौ । ययोः पाद्यं पाथः पशुपतिजटाजूटतटिनी ययोर्लाक्षालक्ष्मीररुणहरिचूडामणिरुचिः ॥ ८४ ॥ हिमानीहन्तव्यं हिमगिरितटाक्रान्तिचतुरौ निशायां निद्राणं निशि च परभागे च विशदौ । परं लक्ष्मीपात्रं श्रियमतिसृजन्तौ समयिनां सरोजं त्वत्पादौ जननि हसतश्चित्रमिह किम् ॥ ८५ ॥ नमोवाकं ब्रूमो नयनरमणीयाय पदयोस्तवास्मै द्वन्द्वाय स्फुटरुचिरसाऽलक्तकवते । असूयत्यत्यर्थं यदभिहननाय स्पृहयते पशूनामीशानः प्रमदवनकङ्कोलतरवे ॥८६॥ मृषा कृत्वा गोत्रस्खलनमथ वैलक्ष्यनमितं ललाटे भर्तारं चरणयुगले ताडयति ते । चिरादन्तःशल्यं दहनकृतमुन्मीलितवता तुलाकोटिक्वाणैः किलिकिलितमीशानरिपुणा ॥ ८७ ॥ पदं ते कान्तीनां प्रपदमपदं देवि विपदां कथं नीतं सद्भिः कठिनकमठीकर्परतुलाम् । कथं वा हस्ताभ्यामुपयमनकाले पुरभिदा तदादाय न्यस्तं दृषदि दयमानेन मनसा ॥ ८८ ॥ नखैर्नाकस्त्रीणां करकमलसंकोचशशिभिस्तरूणां दिव्यानां हसत इव ते चण्डि चरणौ फलानि स्वस्थेभ्यः किसलयकराग्रेण ददतां दरिद्रेभ्यो भद्रां श्रियमनिशमह्नाय ददतौ ॥ ८९ ॥